Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

मासिक दान पद्धति

लेखक
श्री मङ्गलानन्द राजोपाध्याय

प्रकाशक:
अमरमान जोशी

नेपालीय संवत् १०९४

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

वक्तव्य

अति भीषणं यमलोकस्य वर्णनम् । यच्छ्रुत्वा गरुडोऽपि कम्पित :। तन्मार्गं सर्वैर्गन्तव्यमेव । तत्पुरपथिकानां निर्भयत्वाय मासिकदानोपायोऽपि निगमे निर्दिष्टः। किन्त्वस्मिन् विषये पृथक् पद्धतिरद्यावधि प्रकाशिता न दृश्यते । तन्मया दिवं गतानां श्रेयसे गारुडमहापुराणान्तर्गतं धर्मखण्डं समाश्रित्य सम्पादितवाक्यसमुदायेनेयं पद्धतिराविष्कृता । यामाश्रित्य मासिकश्राद्धजलान्नदानादिकर्म क्रियते चेत् परोपकारं मत्वाऽऽत्मानं कृतकृत्यं मन्ये ।

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya Upload Nepal Sanskrit Academy

चिकीधंगु जूसाँ थ्व पद्धति पिकाय् दुगुलिँ जिगु मन शान्त जूगु साथे परमात्माया कृपाद्वारा न्हिँ न्हिँ सुथे लुमंके बहम्ह स्वर्गीय पिता श्री देवमान जोशीज्यूया आत्मा व मेपिँ परलोकयात्री दक्वसियानँ मन शान्ति जुया परमेश्वरयाके लीन ज्वी दयमा धयागु आकांक्षा याना थ्व सफू समर्पण याना।

प्रकाशन मिति चैत्र शुक्ल षष्ठी
पूज्य पिताया
प्रथम वार्षिक श्राद्ध

प्रकाशक
अमरमान जोशी
शहीद शुक्र मार्ग, ललितपुर।

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

शुद्धाशुद्ध

पृष्ट संख्या	पंक्ति	शुद्ध	अशुद्ध
वक्तव्य	१	गरुडोऽपि	गरुडोऽपि
,,	२	तन्मार्गं	तन्मागं
,,	२	सर्वैर्गन्तव्यमेव	सर्वैर्गन्तव्यमेव
,,	३	...दानोपायोऽपि	दानोपायोऽपि
२	८	सम्प्रददे	सम्प्रदेदा
३	४	—नगासि ..	.. नगरसि ..
४	५	स्वेष्टदेवता ..	स्वेष्टदेता
६	१	वरुणदैवतं	वरुणदैवतं
६	२	रुद्रदैवतां	रुद्रदैवतां
१०	१	तण्डुलै ..	तन्एडुलै

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

१०	४	गतोऽमुक	गतोऽमुक
१०	६	वरुणादेवतं	वरुणादेवतं
११	७	वरुणादेवते	वरुणादेवते
१२	४	...क्रन्दनशीले	...क्रन्दनशीले ...
१२	५	दारुण	दारुण ...
१३	४	वृष्टथा	वृष्टया
१३	७	कमण्डलु	कमण्डलू
१५	१	ऊनाब्दिके	ऊनाब्दिने
१६	६	ऊर्णवस्त्रं	ऊर्णावस्त्रं
१६	६	दानप्रतिष्ठां	दाप्रनतिष्ठां

मासिक दान्या सामान

१० महिनाया:- च्वामो पंखा, कमण्डलु, अन्न, जल।

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

श्रीगणेशाय नमः ॥ ॥ अथ मासिकदानवाक्यानि ॥
प्रथमे मासे सौम्यपुरगमनम् ॥ तस्मिन्दिने आसनदानम् ॥ ॥
देशकालौ संकीर्त्य ॥ अमुक गोत्रस्य यजमानस्य दिवं गतोऽ
मुक .....नाम्नः प्रथमे मासे यमलोकस्य षोड़श नगरान्तर्गते
पुष्पभद्राख्यया नद्या परिवेष्टिते सौम्यपुरगमने तत्पुर वासिनां
प्रेतानां भयनिवारणपूर्वकं स्वेष्टदेवताविराजितैश्वर्यादिसम्पन्न-
लोकप्राप्तये हंसतूलिप्रतिच्छन्नं आसनं वृहस्पतिदैवतम् अमुक
वेदाध्यायिने अमुक गोत्रायामुक शर्मणे ब्राह्मणाय तुभ्यमहं
सम्प्रददे ॥ ततो जलान्नदानं दानप्रतिष्ठा च देया ॥

CC0. Hemambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

त्रिपाक्षिके सौरिपुरगमनम् ॥ तस्मिन्दिने रत्नजटितसुवर्णमुद्रिका-
दानम् ॥ देशकालौ संकीर्त्य ॥ अमुक गोत्रस्य यजमानस्य दिवं
गतोऽमुकः.....नाम्नः त्रिपाक्षिके यमलोकस्य षोड़श
नगरान्तर्गते कालरूपधारिणा जंगमेनोपभुक्ते सौरिपुरगमने
द्वादशादित्यातपोद्भवादि दुःखनिवारणपूर्वकं स्वेष्टदेवतासायुज्-
त्वैश्वर्यादिसम्पन्नलोकप्राप्तये रत्नजटितां सुवर्णमुद्रिकाम् अग्नि-
दैवताम् अमुक वेदाध्यायिने अमुक गोत्रायामुक शर्मणे ब्राह्मणाय
तुभ्यमहं सम्प्रदेदा ॥ ततो जलान्नदानं दानप्रतिष्ठां च ॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

त्रिपाक्षिके सौरिपुरगमनम् ॥ तस्मिन्दिने रत्नजटितसुवर्णमुद्रिका-
दानम् ॥ देशकालौ संकीर्त्य ॥ अमुक गोत्रस्य यजमानस्य दिवं
गतोऽमुकः.....नाम्नः त्रिपाक्षिके यमलोकस्य षोड़श
नगरान्तर्गते कालरूपधारिणा जंगमेनोपभुक्ते सौरिपुरगमने
द्वादशादित्यातपोद्भवादि दुःखनिवारणपूर्वकं स्वेष्टदेवताविराजि-
तैश्वर्यादिसम्पन्नलोकप्राप्तये रत्नजटितां सुवर्णमुद्रिकाम् अग्नि-
दैवताम् अमुक वेदाध्यायिने अमुक गोत्रायामुक शर्मणे ब्राह्मणाय
तुभ्यमहं सम्प्रदेदा ॥ ततो जलान्नदानं दानप्रतिष्ठां च ॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

द्वितीये मासे नगेन्द्रभवनगमनम् ॥ तस्मिन्दिने छत्रभूषणवस्त्राणि देयानि ॥ ॥ देशकालौ संकीर्त्य ॥ अमुक गोत्रस्य यज्ञमानस्य दिवं गतोऽमुकः.....नाम्नो द्वितीये मासे यमलोकस्य षोड़श नगरान्तर्गते बहून्छितैर्भीषणनगरसिपत्रवृक्षैश्चापूरिते नगेन्द्रभवनगमने तत्स्थानीयनगारोहणावरोहणा दे दुःखनिवारणार्थम् असिपत्रैर्गात्रच्छेदनादि भयनिवारणपूर्वकं स्वेष्टदेवताविराजितैश्वर्यादि सम्पन्न लोकप्राप्तये च छत्रम् इन्द्रदैवतं भूषणानि वस्त्राणि च बार्हस्पत्यदैवतानि अमुक वेदाध्यायिने अमुक गोत्रायामुक शर्मणे ब्राम्हणाय तुभ्यमहं सम्प्रदे ॥ ततो जलान्नदानं दानप्रतिष्ठां च ॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

तृतीये मासे गन्धर्वपत्तनगमनम् ॥ तस्मिन्दिने तालवाद्यं वा स्वरवाद्यं वा तन्त्रीवाद्यं देयम् ॥ देशकालौ संकीर्त्य ॥ अमुक गोत्रस्य यजमानस्य दिवं गतोऽमुक....नाम्नस्तृतीये मासे यमलोकस्य षोड़श नगरान्तर्गते बहुचिन्ताजनके गन्धर्वपत्तनगमने तत्स्थानजन्यव्याकुलादि दुःखनिवारणपूर्वकं स्वेष्टदेताविरा-जितैश्वर्यादिसम्पन्न लोकप्राप्तये स्वरवाद्यं वा तालवाद्यं वा तन्त्री वाद्यं गन्धर्वदैवतम् अमुक वेदाध्यायिने अमुक गोत्रायामुक शर्मणे ब्राम्हणायतुभ्यमहं सम्प्रददे ॥ ततो जलान्नदानं दानप्रतिष्ठां च ॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

चतुर्थे मासे शैलागमपुरगमनम् ॥ तस्मिन् दिने छत्रदण्डदानम् ॥ देशकालौ संकीर्त्य ॥ अमुक गोत्रस्य यजमानस्य दिवं गतोऽमुकः .....नाम्नः चतुर्थे मासे यमलोकस्य षोड़श नगरान्तर्गते शैलागमपुरगमने पाषाणवर्षणोद्भूताशिलाप्रहारादिदुःखनिवारण-पूर्वकं स्वेष्टदेवताविराजितैश्वर्यादिसम्पन्नलोकप्राप्तये छत्रम् इन्द्र-दैवतं दण्डं यमदैवतं अमुक वेदाध्यायिने अमुक गोत्रायामुक शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रद्दे ॥ ततो जलान्नदानं दान-प्रतिष्ठां च ॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

पञ्चमे मासे क्रौञ्चपुरगमनम् ॥ तस्मिन् दिने लोहमयायुधदा-
नम् ॥ देशकालौ संकीर्त्य ॥ अमुक गोत्रस्य यजमानस्य दिवं
गतोऽमुकः ..... नाम्नः पञ्चमे मासे यमलोकस्य षोडश
नगरान्तर्गते काकोलूकादि खेचरैः सिंहव्याघ्रादि हिंस्रकजन्तु-
भिश्च सहिते क्रौञ्चपुरगमने तत्स्थानजन्यपीडाशान्तिपूर्वकं स्वेष्ट-
देवताविराजितैश्वर्यादिसम्पन्नलोकप्राप्तये लोहमयम् आयुधं
भैरवदैवतम् अमुक वेदाध्यायिने अमुक गोत्रायामुक शर्मणे
ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥ ततो जलान्नदानं दान प्रतिष्ठां
च ॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

ऊनषाण्मासिके क्रूरपुरगमनम् ॥ तस्मिन्दिने सप्तधातुमयद्रव्य-
दानम् ॥ धनदानं च ॥ देशकालौ संकीर्त्य ॥ अमुक गोत्रस्य
यजमानस्य दिवं गतोऽमुकः ..... नाम्न ऊनषाण्मासिके
यमलोकस्य षोड़श नगरान्तर्गते दयावर्जितजनसमूहान्विते क्रू र-
पुरगमने तज्जन्यशरीरकम्पनादिदुःखनिवारणपूर्वकं स्वेष्टदे-
वताविराजितैश्वर्यादिसम्पन्नलोकप्राप्तये सप्तधातुमयं द्रव्यं धनं च
कुबेरदैवतम् अमुक वेदाध्यायिने अमुक गोत्रायामुक शर्मणे
ब्राम्हणाय तुभ्यमहं सम्प्रददे ॥ ततो जलान्नदानं दानप्रतिष्ठां च ॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

षाण्मासिके चित्रभवने वैतरणीतरणम् ॥ तस्मिन्दिने ताम्रपात्रे जलेनापूर्य जलोपरि रजतनिर्मितां नौकां हिरण्मयौ नौकादण्डौ च निधाय तत्सान्निध्ये सालङ्कारां गां निधाय वस्त्रभूषणादिभिश्च संयोज्य दानम् ॥ देशकालौ संकीर्त्य ॥ अमुक गोत्रस्य यजमानस्य दिवं गतोऽमुक.....नाम्नः षाण्मासिके यमलोकस्य षोड़श नगरान्तर्गते यमानुजेन विचित्रेणोपभुक्ते शतयोजनविस्तीर्णया पूयशोणितवाहिन्या वैतरण्या समन्विते चित्रभवनगमने वैतरणी-निवासिनां महाग्राहादीनां जलौकसां भयनिवारणपूर्वकं स्वेष्ट-देवता विराजितैश्वर्यादिसम्पन्नलोकप्राप्तये हिरण्मयनौकादण्ड-

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

सहितां रजतनौकां विश्वकर्मदैवतां सजलं ताम्रपात्रं वरूणदैवतं सालंकारां धेनूं रूद्रदैवतां भूषणवस्त्रादीनि वृहस्पतिदैवतानि अमुक वेदाध्यायिने अमुक गोत्रायामुक शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥ ततो जलान्नदानं दानप्रतिष्ठां च ॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

सप्तमे मासे वह्वापदपुरगमनम् ॥ तस्मिन्दिने तन्दुलैरापूरितं
कण्डोलं तण्डुलपाकभाण्डं, तेमनपात्रं तत्पाकभाण्डं भूषणवस्त्रा-
दीनि च देयानि ॥ ॥ देशकालौ संकीर्त्य ॥ अमुक
गोत्रस्य यजमानस्य दिवं गतोऽमुक.....नाम्नः सप्तमे मासे
यमलोकस्य षोड़श नगरान्तर्गते क्षुत्तृषादि वह्वापत्तिजनके
वह्वापदपुरगमने तत्स्थानजन्यसर्वापत्तिनिवारणपूर्वकं स्वेष्टदेवता-
विराजितैश्वर्यादिसम्पन्नलोकप्राप्तये तण्डुलपूरितं कण्डोलं विश्वक-
र्मदैवतं भोजनपात्रं तेमनपात्रं च विश्वकर्मदैवतं सजलं पानीयपात्रं
वरुणदैवतं तेमनान्नपाकभाण्डानि विश्वकर्मदैवतानि अमुक
वेदाध्यायिने अमुक गोत्रायामुक शर्मणे ब्राम्हणाय तुभ्यमहं
सम्प्रददे ॥ ततो जलान्नदानं दानप्रतिष्ठां च ॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

अष्टमे मासे दुःखदपुरगमनम् ॥ तस्मिन्दिने तिलपूर्णं ताम्रपात्रम् उपानहौ रजतवेष्टितो दण्डश्च देयः ॥ देशकालौ संकीर्त्य ॥ अमुक गोत्रस्य यजमानस्य दिवं गतोऽमुकः ..... नाम्नः अष्टमे मासे यमलोकस्य षोडश नगरान्तर्गते क्षुरधारास्तृते शंकुप्रसारिते ध्मातताम्रमार्गान्विते निरालम्बे दुःखदपुरगमने तत्स्थानजन्यमहद्दुःखनिवारणपूर्वकं स्वेष्टदेवताविराजितैश्वर्यादिसम्पन्नलोकप्राप्तये तिलपूर्णं ताम्रपात्रं विश्वकर्मदैवतम् उपानहौ वरूणदैवते रजतवेष्टितं दण्डं यमदैवतम् अमुक वेदाध्यायिने अमुक गोत्रायामुक शर्मणे ब्राम्हणाय तुभ्यमहं सम्प्रददे ॥ ततो जलान्नदानं दानप्रतिष्ठां च ॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

नवमे मासे नानाक्रन्दपुरगमनम् ॥ तस्मिन्दिने हिरण्मयाभूषण-
दानम् ॥ देशकालौ संकीर्त्य ॥ अमुक गोत्रस्य यजमानस्य
दिवं गतोऽमुक.....नाम्नः नवमे मासे यमलोकस्य षोड़श
नगरान्तर्गते भीषणाक्रन्दनशोलैर्दूतगणैः सेविते नानाक्रन्दपुरगमने
शून्यहृदयेन समाक्रन्दनादि दारूणदुःखनिवारणपूर्वकं स्वेष्टदेवता-
विराजितैश्वर्यादिसम्पन्नलोकप्राप्तये हिरण्यनिर्मितम् आभूषणम्
अग्निदैवतम् अमुक वेदाध्यायिने अमुक गोत्रायामुक शर्मणे
ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥ ततो जलान्नदानं दानप्रतिष्ठां च ॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

दशमे मासे सुतप्तभवनपुरगमनम् ॥ तस्मिन्दिने चामरव्यजनक-
मण्ड़लुदानम् ॥ देशकालौ संकीर्त्य ॥ अमुक गोत्रस्य यजमानस्य
दिवं गतोऽमुकः..... नाम्नः दशमे मासे यमलोकस्य षोड़श
नगरान्तर्गते परितो दावाग्निना उपर्यङ्गारवृष्टया द्वादशादित्यकिर-
णैश्च संतप्ते दुःखदपुरगमने तत्स्थानजन्यातपोद्भवादि दुःख
निवारणपूर्वकं स्वेष्टदेवतादिविराजितैश्वर्यादिसम्पन्नलोकप्राप्तये
चामरं विद्याधराप्सरोदैवतं व्यजनं वायुदैवतं जलपूर्णं कमण्डलूं
विश्वकर्मदैवतम् अमुक वेदाध्यायिने अमुक गोत्रायामुक शर्मणे
ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥ ततो जलान्नदानं दानप्रतिष्ठां च ॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

एकादशे मासे रौद्रपुरगमनम् ॥ तस्मिन्दिने हिरण्मयशार्दूलमूर्ति-
दानम् ॥ देशकालौ संकीर्त्य ॥ अमुक गोत्रस्य यजमानस्य दिवं
गतोऽमुक.....नाम्नः एकादशे मासे यमलोकस्य षोडशनग-
रान्तर्गते भयङ्करजनैः पूरिते रौद्रपुरगमने तत्स्थानजन्य अत्युग्रभय-
निवारणपूर्वकं स्वेष्टदेवताविराजितैश्वर्यादिसम्पन्नलोकप्राप्तये हिर-
ण्यनिर्मितां शार्दूलमूर्तिम् अग्निदैवताम् अमुक वेदाध्यायिने अमुक
गोत्रायामुक शर्मणे ब्राम्हणाय तुभ्यमहं सम्प्रददे ॥ ततो जलान्न-
दानं दानप्रतिष्ठां च ॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya, Upload Nepal Sanskrit Academy

ऊनाब्दिने पयोवर्षणपुरगमनम् ॥ तस्मिन्दिने छत्रदानम् ॥ देश-
कालौ संकीर्त्य ॥ अमुक गोत्रस्य यजमानस्य दिवं गतोऽमुकः
.....नाम्न ऊनाब्दिके यमलोकस्य षोडश नगरान्तर्गते
मेघोष्णाम्बुवर्षणशीले पयोवर्षणपुरगमने तत्स्थानजन्यपीड़ाशान्ति-
पूर्वकं स्वेष्टदेवताविराजितैश्वर्यादिसम्पन्नलोकप्राप्तये छत्रम् इन्द्र-
दैवतम् अमुक वेदाध्यायिने अमुक गोत्रायामुक शर्मणे ब्राह्मणाय
तुभ्यमहं सम्प्रददे ॥ ततो जलान्नदानं दानप्रतिष्ठां च ॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

प्रथमे वर्षे शीताढ्यपुरगमनम् ॥ तस्मिन्दिने ऊर्णावस्त्रम् अङ्गार-धानिका च दातव्या ॥ देशकालौ संकीर्त्य ॥(अमुक गोत्रस्य यजमानस्य दिवं गतोऽमुकः.....नाम्नः प्रथमाब्दे यमलोकस्य षोड़श नगरान्तर्गते हिमाच्छतगुणशीतवातेन पूरिते शीताढ्यपुरगमने तत्स्थानजन्यशीतक्षुत्तृषादि दुःखनिवारणपूर्वकं स्वेष्टदेवताविराजि-तैश्वर्यादिसम्पन्नलोकप्राप्तये ऊर्णावस्त्रं वृहस्पतिदैवतं वह्नियुक्ताम् अङ्गारधानिकां विश्वकर्मदैवताम् अमुक वेदाध्यायिने अमुक गोत्रा-यामुक शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥ ततो जलान्नदानं दाग्रनतिष्ठां च ॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

अब्दान्ते बहुभीतिपुरगमनम् ॥ तस्मिन्दिने नरयानदानम् ॥ वार्षिकाभ्यन्तरे अधिमासश्चेत् पूर्वोक्तं दानं त्रयोदशे मासे करणीयम्, न तु वार्षिके ॥ देशकालौ संकीर्त्य ॥ अमुक गोत्रस्य यजमानस्य दिवं गतोऽमुकः.....नाम्नः अब्दान्ते यमलोकस्य षोड़श नगरान्तर्गते यमपुरसान्निध्याद्बहुविधभयपूर्णे बहुभीतिपुरगमने तत्स्थानजन्य भयनिवारणपूर्वकं स्वेष्टदेवताविराजितैश्वर्यादिसम्पन्नलोकप्राप्तये नरयानं व्योमाधिदैवतम् अमुक वेदाध्यायिने अमुक गोत्रायामुक शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥ ततो जलान्नदानं दानप्रतिष्ठां च ॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

तदनन्तरं सप्तभ्यो विप्रेभ्यः सप्तपददानम् ॥

तद्यथाः— छत्रोपानहवस्त्राणि मुद्रिका च कमण्डलुः ॥
आसनं पञ्चपात्राणि पदं सप्तविधं स्मृतम् ॥

देशकालौ संकीर्त्य ॥ अमुक गोत्रस्य यजमानस्य दिवं गतोऽमुक
.....नाम्नो यमलोकवर्त्मनि बहुभीतिपुरान्तरचतुश्चत्वारिंशद्योजनाग्रे
यमपुरगमने वृष्ट्यातपादि पीड़ाशान्त्यर्थं छत्रम् इन्द्रदैवतं, संतप्त
बालुकाकीर्णे कण्टकादियुते अतिदारुणस्थले अश्वमारुह्य सुखेन
गमनार्थम् उपानहौ वरुणदैवते, शीतोष्णादि दुःखनिवारणार्थं
भूषणवस्त्राणि बृहस्पतिदैवतानि निर्दयित्वेन ताड़नशीलानां

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

यमदूतानां भयनिवारणार्थं हिरण्यमुद्रिकाम् अग्निदैवतां, महता परिश्रमेण गमनोद्भूतपिपासादिदुःखशमनार्थं जलपूर्णं ताम्रनिर्मितं कमण्डलुं विश्वकर्मदैवतं, यत्र कुत्रापि विश्रामे सुखासनप्राप्त्यर्थं हंसतूलिप्रतिच्छन्नम् आसनं वरुणदैवतं, अभीष्टभोगप्राप्तये हव्य-कव्येषु प्रयुक्तं पञ्चपात्रं विश्वकर्मदैवतं, अमुक वेदाध्यायिभ्यो ब्राह्मणेभ्यो यथांशेन विभज्य दातुमहमुत्सृजे ॥ ततो दानप्रतिष्ठां भूयसीं च दद्यात् ॥ इति सप्तपददानम् ॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

अन्तकाले समयाभावेन अष्टमहादानविहीने सति प्रथमे साम्वत्सरिकदिवसे दानमप्यर्हति

अष्टमहादानद्रव्याणिः—

तिला लोहं हिरण्यं च कार्पासो लवणं तथा ॥
सप्तधान्यं क्षितिर्गावो ह्येकैकं पावनं स्मृतम् ॥

सप्तधान्यद्रव्याणिः—

व्रीहयो यवगोधूमा मुद्गा माषाः ❀ कुलत्थकाः ॥
चणकाः सप्तमा ज्ञेया सप्तधान्यमुदाहृतम् ॥

❀ प्रियङ्गव इति पाठान्तरम् ॥

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya, Upload Nepal Sanskrit Academy

१ छगूगु महीनाया:— आसन, अन्न, जल ।
४५ दिनया:— रत्न जडेयाना त:गु लुँयागु अंगू, अन्न, जल ।
२ महिनाया:— कुसा, तिसा. वस्त्र, अन्न, जल ।
३ महीनाया:— बाजा, अन्न, जल ।
४ महीनाया:— कुसा, कथि, अन्न, जल ।
५ महीनाया:— नँयागु हतियार, अन्न, जल ।
५॥ महीनाया:— न्हयगु किसिमया धातु, धनद्रव्य, अन्न, जल ।
६ महीनाया:— सिज:धा बाटा, ओहया डुङ्गा, लुँया चवँ २ सा, वस्त्र, तिसा, अन्न, जल ।
७ महीनाया:— जाकीं जा:गु दाला. तसला वा कसौडी. व्यञ्जनपात्र, व्यञ्जन बुकेगु थल, तिसा वस:, अन्न, जल ।

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu

Photographed By Abhas Rajopadhyaya. Upload Nepal Sanskrit Academy

८ महीनाया:— हामो, हामो वयगु [illegible] अन्न, जल, लुका, आह हिनागु तुतां, अन्न, जल।

९ महीनाया :— लुँया तिसा, अन्न, जल।

१० महीनाया:— च्वामो पंखा, अन्न, जल।

११ महीनाया:— लुँया शार्दूलमूर्ति, अन्न, जल।

११॥ महीनावा:— कुसा, अन्न, जल।

१२ महीनाया:— ऊनी अथवा तेंया वस्त्र, मक:, अन्न, जल।

अधिमास महीनाया:— विमान, अन्न, जल।

सप्तपद्दानया सामान:— कुसा, लक्ँा. वस्त्र, लूँअंगू, कमण्डलु, आसन, पञ्चपात्र।

अष्ट महादानया सामान:— हामो, नँ, लुँ, कपाय्, चि, सप्तधान्य, पृथिवी, सा।

सप्त धान्य सामान:— स्वांवा, तछो, छो, गोमू, मोमाय्. कोल, चना।

CC0. Herambananda Rajopadhyaya Personal Copy, Kathmandu